# संस्कृत-वार्ता:

**दिनाङ्क :-11.06.2024**

**प्रात: - 06:55**

**अथ वार्ता:**

**मन्त्रीपद-आवंटन**

नूतन केन्द्रीय मन्त्रिणां विभागाः आवंटिता:। केन्द्रीयमन्त्रीणं राजनाथसिंह पुनः रक्षामन्त्रालय: प्रदत्त:। श्री अमित शाह: गृहमन्त्री तथा सहकारितामन्त्री आस्ते। नितिनगडकरी पुनैंकवारं पथपरिवहन मन्त्री एवं राज मार्गमन्त्री जनिष्यति । जगत प्रकाश नड्डा इत्यस्मै स्वास्थ्य एवं परिवार कल्याण मन्त्रालय: तथा रसायनं एवं उर्वर मन्त्रालय: आवंटित:। शिवराजसिंह चौहानाय कृषि तथा ग्रामीण विकास मन्त्रालयस्य प्रभार: प्रदत्त:। निर्मलासीतारमण: इत्यस्यै वित्तमन्त्रालय: आवंटित:, डॉ. सुब्रमण्यमजयशंकराय विदेशमन्त्रालयस्य प्रभारः प्रदत्तः। अश्विनीवैष्णवाय रेलमन्त्रालयस्य साकं सूचना एवं प्रसारणमन्त्रालय: आवंटित:।

हरियाणा-राज्यस्य पूर्वमुख्यमन्त्रिणे मनोहरलालाय आवास एवं नगरविकासमन्त्रालयस्य अथ ऊर्जामन्त्रालयस्य च उत्तरदायित्व: दत्त:। किरेन् रिजिजु संसदकार्यमन्त्री, अन्नपूर्णादेवी च महिलाविकासमन्त्री भविष्यत:। चिराग पासवान इत्यस्मै खाद्य प्रसंस्करण मन्त्रालयं तत्रैव ज्योतिरादित्य सिन्धिया संचारमन्त्रालयं पश्येत्।

एच् डी कुमारस्वामी भारयुक्त उद्योगमन्त्री भविता। बिहारस्य पूर्वमुख्यमन्त्री जीतनराममांझीः सूक्ष्म-लघु-मध्यम-उद्यम् मन्त्री भूयात्। सर्वानन्द सोनोवाल: जहाजरानीमन्त्रालय: अथ ललन सिंह: पंचायतीराजमत्रालय: निभालयिष्यति। प्रह्लाद जोशीने उपभोक्तृ मन्त्रालयस्य उत्तरदायित्वं प्रदत्तम्। गिरिराजसिंहाय वस्त्रमन्त्रालयः, भूपेन्द्र यादवाय पर्यावरणमन्त्रालयः, हरदीपसिंहपुरीइत्यस्मै पेट्रोलियममन्त्रालयः आवंटिता:। मनसुख मण्डाविया इत्यसौ नूतनः क्रीडामन्त्री भविता। डॉ. एल.मुरुगनः पुनः सूचना एवं प्रसारणमन्त्रालये राज्यमन्त्री भविष्यति।

**प्रधानमन्त्री-आवास योजना**

केन्द्रीय प्रशासनं प्रधानमन्त्रि-आवास-योजनाया: अन्तर्गतं आवासस्य आवश्यकतां सम्पूर्तये गृहाणां निर्माणार्थं त्रिकोटितोप्यधिक ग्रामीण नगरीय गृहेभ्य: सहायतां प्रदास्यति। गतदिने नवदिल्ल्यां एन.डी.ए. प्रशासनस्य प्रथममन्त्रिमण्डल उपवेशने निर्णयोऽयं स्वीकृत:। केन्द्रीयप्रशासनं पंचदशोत्तर द्विसहस्त्रतमवर्षत: एव प्रधानमन्त्री आवास योजनाया: कार्यान्वयनं कुर्वत् अस्ति। योजनाया: अन्तर्गतं विगतदशवर्षेषु निर्धनपरिवारेभ्य: आहत्य एकविंशति: लक्षाधिक चतुर्कोटिः गृहाणि प्रदत्तानि। योजनाया: अन्तर्गतं निर्मितानां गृहेषु शौचालय:, एल.पी.जी. इत्यस्य संयोजनं, विद्युतसंयोजनं, गृह-जलनलिका संयोजनं, इत्यादय: सौविध्यं अपि प्रदत्तम् प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रोक्तं यत् प्रशासनं सर्वदा जनानां कल्याणाय कार्यं करिष्यति।

**प्रधानमंत्री-कृषक**

प्रधानमन्त्रिणा नरेन्द्रमोदिना तृतीयवारं प्रधानमन्त्रि-पदभार-ग्रहणानन्तरम् एव गतदिने कृषक सम्मान निधे: सप्तदश तम-भागराशि: हस्तान्तिरित:। अनेन हस्तान्तरेण त्रिंशत् लक्षाधिक-नवकोटि-कृषकेभ्य: विंशति-सहस्र-कोटि-रूप्यकाणां लाभो भविष्यति। श्रीमता मोदिना उक्तं यत् तदीय-प्रशसनस्य प्रथमो निर्णय: कृषककल्याणं प्रति प्रतिबद्धतां द्योतयति। प्रधानमन्त्री अवोचत् यत् आगामि दिनेषु तदीयं प्रशासनं कृषि-क्षेत्राय कृषक-कल्याणाय च प्रतिबद्धतया कार्यं विधास्यति।

## टेनिस

स्टटगार्ट प्रतिस्पर्धायां, टेनिस द्वन्द्वे अद्य जर्मनीदेशे भारतस्य यूकी भांबरी इत्यस्य साकं फ्रांसदेशस्य अल्बानो ओलिवेटी अभियानं प्रारप्स्यति।

**।।इति वार्ता:।।**